तस्मिन् स्नातो नरो देवि! मम लोके महीयते।
तत्राथ मुञ्चते प्राणान्मम लोकं स गच्छति॥
तद्दक्षिणे महादेवि! ऋषितीर्थं परं मम।
तत्र स्नातो नरो देवि! ऋषिलोकं प्रपद्यते॥
अथात्र मुञ्चते प्राणान्मम लोके महीयते।
दक्षिणे ऋषितीर्थस्य मोक्षतीर्थं परं मम॥
स्नानमात्रेण वसुधे! मोक्षं प्राप्नोति मानवः।
तत्राथ मुञ्चते प्राणान् मम लोके महीयते॥
तत्रैव कोटितीर्थं हि तीर्थानामपि दुर्लभम्।
तत्र स्नानेन दानेन मम लोके महीयते॥
कोटितीर्थे नरः स्नातः सन्तर्प्य पितृदेवताः।
तारिताः पितरस्तेन तथैव प्रपितामहाः॥
कोटितीर्थे नरः स्नातो ब्रह्मलोके महीयते।
तत्रैव वायुतीर्थन्तु पितॄणामपि दुर्लभम्॥
पिण्डं दद्यात्तु वसुधे! पितृलोकं स गच्छति।
गयापिण्डप्रदानेन यत् फलं लभते नरः॥
तत् फलं लभते देवि! ज्यैष्ठे दानान्न संशयः।
द्वादशैतानि तीर्थानि देवानां दुर्लभानि च॥
स्नानं दानं जपो होमः सहस्रगुणितं भवेत्।
एषां स्मरणमात्रेण सर्व्वपापैः प्रमुच्यते॥
श्रुत्वा तीर्थस्य माहात्म्यं सर्व्वान् कामानवा-
प्नुयात्॥"

इत्यादि वराहपुराणे मथुरातीर्थप्रभावः॥*॥
इतः प्रभृति सप्तविंशाध्यायेषु मथुरामाहात्म्यं ज्ञेयम्॥

मथुरेशः, पुं, (मथुराया ईशः।) श्रीकृष्णः। इति शब्दरत्नावली॥

मथूरा, स्त्री, (मथ् + वाहुलकात् ऊरः टाप्।) मथुरा। इति द्विरूपकोषः॥

मद, इ ङ स्वप्ने। जाड्ये। मदे। मोदे। स्तुतौ। गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-स्वप्ने जाड्ये मद मोदे अक०-स्तुतौ गतौ च सक०-सेट्।) मन्द्यते। ङ मन्दते जनः स्वपिति जड़ो भवति माद्यति मोदते स्तौति गच्छति वा इत्यर्थः। इति दुर्गादासः॥

मद, ई म य इर् भि हर्षे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-अक०-सेट्।) ई भि मत्तोऽस्ति। म य माद्यति। इर् अमदत् अमादीत्। अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये। इति दुर्गादासः॥

मद, क ङ तृप्तियोगे। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्।) क ङ मनो मादयते यस्य शास्त्राभ्यासरसायनात्। इति दुर्गादासः॥

मद, म गर्व्वे। ग्लेपने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) गर्व्वोऽहङ्कारः। ग्लेपनं दैन्यम्। म मदयति नीचं सम्पत्तिः। मदयति शत्रुं शूरः। इति दुर्गादासः॥

मदः, पुं, (मदयतीति। मद् + अच्।) हस्तिगण्डजलम्। (यथा, भारवौ। २। १८।
"मदसिक्तमुखैर्मृगाधिपः
करिभिर्व्वर्त्तयते स्वयं हतैः।")
तत्पर्य्यायः। दानम् २॥ (माद्यते इति। मद् + "मदोऽनुपसर्गे।" ३। ३। ६७। इति अप्।) हर्षः। (यथा, ऋग्वेदे। १। ४। २।
"उप नः सवनागहि सोमस्य सोमपाः पिब गोदा इद्रेवतो मदः॥" "मदो हर्षः।" इति तद्भाष्ये सायनः।) तत्पर्य्यायः। आमोदः २। इत्यमरः। ३। २। १२।) रेतः। कस्तूरी। (पर्य्यायो यथा,—
"मृगनाभिर्मृगमदो मदः कस्तूरिकाण्डजः॥"
इति वैद्यकरत्नमालायाम्॥
रोगविशेषः। उन्मादस्य प्रथमावस्थायां यथा,
"स चाप्रवृद्धस्तरुणो मदसंज्ञां बिभर्त्ति च।"
इति माधवकृतरुग्विनिश्चये उन्मादाधिकारे॥
विशेषोऽस्य यथा,—
यदा तु रक्तवाहीनि रससंज्ञावहानि च।
पृथक् पृथक् समस्ता वा स्रोतांसि कुपिता मलाः॥
मलिनाहारशीलस्य रजोमोहावृतात्मनः।
प्रतिहत्यावतिष्ठन्ते जायन्ते व्याधयस्तदा॥
मदमूर्च्छायसंन्यासास्तेषां विद्याद्विचक्षणः।
यथोत्तरं बलाधिक्यं हेतुलिङ्गोपशान्तिषु॥
दुर्ब्बलश्चेतसः स्थानं यदा वायुः प्रपद्यते।
मनो विक्षोभयन् जन्तोः संज्ञां संमोहयेत्तदा॥
पित्तमेवं कफश्चैवं मनो विक्षोभयन् नृणाम्।
संज्ञां नयत्याकुलतां विशेषश्चात्र वक्ष्यते॥
स्खलानल्पद्रुताभाषश्चलस्खलितचेष्टितम्।
विद्याद्वातमदाविष्टं रूक्षश्यावारुणाकृतिम्॥
सक्रोधपरुषाभाषं संप्रहारकलिप्रियम्।
विद्यात् पित्तमदाविष्टं रक्तपीतासिताकृतिम्॥
स्वल्पसम्बन्धवचनं तन्द्रालस्यसमन्वितम्।
विद्यात् कफमदाविष्टं पाण्डुं प्रध्यानतत्परम्॥
सर्व्वाण्येतानि रूपाणि सन्निपातकृते मदे।
जायन्ते शाम्यति त्वाशु मदो मद्यमदाकृतिः॥
यश्च मद्यमदः प्रोक्तो विषजो रौधिरश्च यः।
सर्व्व एते मदास्तैस्तै वातपित्तकफाश्रयात्॥"
इति चरके सूत्रस्थाने चतुर्व्विंशेऽध्याये॥)
गर्व्वः। इति मेदिनी। दे, १२॥ (यथा, भारवौ। २। ४९।
"मदमानसमुद्धतं नृपं
न वियुङ्क्ते नियमेन मूढ़ता॥")
मद्यम्। क्षैव्यम्। मत्ततेति यावत्। इति हेमचन्द्रः। २। २२६॥ (यथा, मनौ। ७। ४७।
"मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियो मदः।"
"तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः॥")
नदः। कल्याणवस्तु। इति धरणिः॥*॥
मदलक्षणं यथा,—
"अहं महात्मा धनवान् मत्तुल्यः कोऽस्ति भूतले।
इति यज्जायते चित्तं मदः प्रोक्तः स कोविदैः॥"
इति पाद्मे क्रियायोगसारे १६ अध्यायः॥
तस्य उत्पत्तिर्यथा।
"बुद्धेर्मोहः समभवदहङ्कारादभून्मदः।"
इति मात्स्ये ३ अध्यायः॥
(दानवभेदः। यथा, हरिवंशे। ३। ८६।
"असिलोमा सुकेशी च शठश्च वशको मदः॥"

मदकटः, पुं, (मदं कटति प्रकटयतीति। कट् + अच्।) षण्ढः। षाँड़ इति भाषा॥ यथा।
इड्चरो इट्चरौ गोपतिः षण्डो वृषो मदकटो हलः। इति हेमचन्द्रः। ४। ३२५॥

मदकलः, पुं, (मदेन कलोऽव्यक्तमधुरध्वनिर्यस्य।) मत्तहस्ती। तत्पर्य्यायः। मदोत्कटः २। इत्यमरः। २। ८। ३५॥ अव्यक्तप्रलापी। इति शब्दरत्नावली॥ मदाव्यक्तवाचिनि त्रि। इति मेदिनी। ले, १५९॥ (यथा, उत्तरचरिते २ अङ्के।
"मदकलमयूरकण्ठच्छविभिरवकीर्णानि।")

मदगन्धः, पुं, (मदस्य दानस्येव गन्धोऽस्य।) सप्तच्छदवृक्षः। इति राजनिर्घण्टः॥ (विवरणमस्य सप्तच्छदशब्दे ज्ञेयम्।)

मदगन्धा, स्त्री, (मदः मादनः गन्धोऽस्याः।) मदिरा। अतसी। इति राजनिर्घण्टः॥

मदघ्नी, स्त्री, (मदं मत्ततां हन्तीति। मद् + हन् टक् ङीप्।) पूतिका। इति जटाधरः॥

मदनः, पुं, (मदयतीति। मद् + णिच् ल्युः।) कामदेवः। इत्यमरः। १। १। २६॥
तस्य नाम्नां व्युत्पत्तिर्यथा। ऋषय ऊचुः।
"यस्मात् प्रमथ्य चेतस्त्वं जातोऽस्माकं तथा विधेः।
तस्मान्मन्मथनाम्ना त्वं लोके गेयो भविष्यसि॥
जगत्सु कामरूपस्त्वं त्वत्समो न हि विद्यते।
अतस्त्वं कामनाम्नापि ख्यातो भव मनोभव!॥
मदनान्मदनाख्यस्त्वं शम्भोर्दर्पात् सदर्पकः।
तथा कन्दर्पनाम्नापि लोके ख्यातो भविष्यसि॥"
इति कालिकापुराणे २ अध्यायः॥
ब्रह्मणस्तस्योत्पत्तिर्यथा,—
"प्रहृष्टमानसः पुत्त्रं कन्यकाञ्च ससर्ज्ज ह।
हृष्टस्य कामिनः पुत्त्रः कामदेवो बभूव ह॥
कन्या षोड़शवर्षीया रत्नभूषणभूषिता॥
उवाच पुत्त्रं स विधिः सुदीप्तं पुरतः स्थितम्।
दुर्न्निवार्य्यं मत्कलांशं स्वात्मारामं मनोहरम्॥
ब्रह्मोवाच।
स्त्रीपुंसोः क्रीड़नार्थाय सुदा त्वञ्च विनिर्म्मितः।
हृदि योगेन सर्व्वेषामधिष्ठानं करिष्यसि॥
सम्मोहनं समुद्वेगबीजं स्तम्भितकारणम्।
उन्मत्तबीजं ज्वलनं शश्वच्चेतनहारकम्॥
प्रशस्त्रैतान्मया दत्तान् सर्व्वान् सम्मोहनं कुरु।
दुर्निवार्य्यो मम वराद्भव वत्स! भवेषु च॥
बाणान्स्त्वैवमुक्त्वा च प्रहृष्टश्च जगद्विधिः।
दृष्ट्वा वाचं दुहितरं वरं दातुं समुद्यतः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३५ अध्यायः॥
(योगाचार्य्यरूपः शिवस्यावतारविशेषः। यथा, शिवपुराणे वायुसंहितायाम्। २। १०। १—२।
श्रीकृष्ण उवाच।
"युगावर्त्तेषु सर्व्वेषु योगाचार्य्यच्छलेन तु।
अवताराणि सर्व्वस्य शिष्यांश्च भगवन्! वद॥"
उपमन्युरुवाच।
"श्वेतः सुतारो मदनः सुहोत्रः कंक एव च॥"
महादेवः। मदयति भक्तानां मनः इति